Code No. **09**

Total No. of Questions : 46 ]

Total No. of Printed Pages : 7 ]

**March, 2011**

# SANSKRIT

Time : 3 Hours 15 Minutes ] [ Max. Marks : 100

I. एतेषां प्रश्नानां उत्तराणि एकैक वाक्येन संस्कृतभाषायां लिखत — 10 × 1 = 10

1) विश्वजितो यज्ञस्य प्रवर्तयिता कः ?

2) कस्मात् मातापि अमाता भवति ?

3) कीदृश्यः प्रजाः विलयं यान्ति ?

4) गुरुवचनं केन न अतिक्रान्तपूर्वम् ?

5) विदूषकस्य नामधेयं किम् ?

6) निगडेन का संयमिता ?

7) उदयनस्य प्रधानामात्यः कः ?

8) कुन्ती कस्य राज्ञः पुत्री ?

9) भरतवंश प्रदीपाः इति विश्रुताः के ?

10) बकध्वंसी कः ?

[ Turn over

II. एतेषु **त्रयाणां** श्लोकानां भाषान्तरं कृत्वा भावं विशदयत — 3 × 4 = 12

11) हृदय भव सकामं यत्कृते शङ्कसे त्वं
श्रृणु पितृनिधनं तद्गच्छ धैर्यं च तावत् ।
स्पृशति तु यदि नीचो मामयं शुल्क शब्द -
स्त्वथ च भवति सत्यं तत्र देहो विशोध्यः ॥

12) विरम विरम वह्ने मुञ्च धूमानुबन्धं
प्रकटयसि किमुच्चैरर्चिषां चक्रवालम् ।
विरहहुत भुजाऽहं यो न दग्धः प्रियायाः
प्रलयदहनभासा तस्य किं त्वं करोषि ॥

13) नीतो विक्रमबाहुरात्म[illegible]तां प्राप्तेयमुर्वीतले
सारं सागरिका ससागरमही प्राप्त्येकहेतुः प्रिया ।
देवी प्रीतिमुपागता च भगिनी लाभाज्जिताः कोसलाः
किं नास्ति त्वयि सत्यमात्यवृषभे यस्मै करोमि स्पृहाम् ॥

14) गिरिवन जल पुष्पैः सर्वतः शोभमाना
मृदुवहपवमाना पावनी रत्नगर्भा ।
शुभचरितविधात्री धर्मशान्त्योः सवित्री
मम हृदयमुपास्ते सौख्यदात्री प्रजानाम् ॥

15) भीमस्य शत्रुगण मर्दनगर्धनस्य
सिंहस्य मत्तगजपाटनलम्पटस्य ।
किं मूढ शस्त्रकथया ननु वज्रकल्पः
त्वन्मस्तकास्थिभिदुरोऽस्ति ममैष मुष्टिः ॥

III. अ) **एकस्योत्तरं** संस्कृतभाषायां, प्रादेशिकभाषायां, आंग्लभाषायां वा प्रबन्धरूपेण लिखत — 1 × 8 = 8

16) एकचक्रानगरं प्रति समापतिता समस्या का ? सा कथं परिहृता ?

17) भासरूपकाणां साम्यांशा: के ?

आ) **द्वयो:** लघुटिप्पण्यौ संस्कृतभाषायां, प्रादेशिकभाषायां, आंग्लभाषायां वा लिखत — 2 × 4 = 8

18) इक्ष्वाकुराजा:

19) रत्नावली

20) वत्सराज:

21) राङ्गनाथशर्मा ।

IV. **चतुर्णां** सन्दर्भं संस्कृतभाषायां लिखत — 4 × 3 = 12

22) दशरथपुत्रो भरतोऽस्मि न कैकेय्या: ।

23) नायोध्या तं विनायोध्या सायोध्या यत्र राघव: ।

24) मन्ये मम प्रियतमा हृदयं प्रविष्टा ।

25) इदानीं सफलपरिश्रमोऽस्मि संवृत्त: ।

26) षडेते मम बान्धवा: ।

27) नहि मातुराज्ञा प्रत्यादेशमर्हति ।

V. अ) **एकस्योत्तरं** संस्कृतभाषायां, प्रादेशिकभाषायां, आंग्लभाषायां वा लिखत — 1 × 10 = 10

28) चन्द्रहासं मारयितुं दुष्टबुद्धिना कृतमुपायं तस्य परिणामं च विशदयत ।

29) त्रीणि अङ्गुलीयकानि इति कथां सङ्ग्रहेण निरूपयत ।

आ) **द्वयो:** लघुटिप्पण्यौ संस्कृतभाषायां, प्रादेशिकभाषायां, आंग्लभाषायां वा लिखत — 2 × 5 = 10

30) शृगालोक्ता: आत्महत्या दोषा:

31) अलसपुत्रा:

32) मदन:

33) नाथन: ।

VI. **पञ्चानां** उपप्रश्नानां उत्तराणि संस्कृतभाषायां लिखत — 5 × 2 = 10

34) **द्वयोः** सन्धिं विभज्य सन्धिनाम लिखत —

कर्णाभरणम् , षडेते, ततस्ततः, सोऽयम् ।

35) **द्वयोः** लिङ्ग विभक्ति वचनानि लिखत —

सन्तापेन, आशा, मनसा, यज्ञस्य ।

36) **द्वयोः** लकारपुरुषवचनानि लिखत —

भवतु, ताडयति, आसीत् , नेष्यति ।

37) **द्वयोः** विग्रहवाक्ये लिखत —

प्रतिदिनम् , नरेन्द्रः, वसिष्ठवामदेवौ, महत्फलम् ।

38) **द्वयोः** व्याकरणरीत्या पदपरिचयं लिखत —

ज्ञातुम् , प्रविश्य, भवितव्यम् , कृतम् ।

39) प्रयोगं परिवर्तयत —

सिंहः पर्णानि खादति ।

**अथवा**

कुमारेण अयोध्यानगरं प्रविश्यते ।

40) व्याकरणदोषान् परिहरत —

i) नमोऽस्तु धर्मपरायणम्

ii) अलं चिन्ता ।

41) अत्रत्यं अलङ्कारं सलक्षणं विवृणुत —

दुर्जनैरभिभूतैषा कुन्तीव परिशोचति ।

VII. 42) संस्कृतभाषायां अनुवदत — 5

ಭಾರತೀಯ ತರುಣರು ಬಾಲಗಂಗಾಧರ ತಿಲಕರಿಂದ ಪ್ರೇರಿತರಾದರು. ಅವರು ''ಸ್ವಾತಂತ್ರ್ಯವು ನನ್ನ ಜನ್ಮಸಿದ್ಧ ಹಕ್ಕು'' ಎಂದು ಘೋಷಿಸಿದರು. ಅವರ ಘೋಷಣೆಯಿಂದ ಪ್ರೇರಿತರಾದ ಯುವಕರು ಸ್ವಸುಖಗಳನ್ನು ಧಿಕ್ಕರಿಸಿ ಯುದ್ಧದಲ್ಲಿ ಭಾಗವಹಿಸಿದರು. ಅವರಲ್ಲಿ ಭಗತ್‌ಸಿಂಗನು ಪ್ರಸಿದ್ಧನು. ಆತ್ಮಾಹುತಿ ಸಮಯದಲ್ಲಿ ಅವನು ಪ್ರಾಯಶಃ ಇಪ್ಪತ್ತು ವರ್ಷದವನಾಗಿರಬಹುದು. ಅವನ ಜೊತೆಗೆ ರಾಜಗುರು ಮತ್ತು ಸುಖದೇವರು ಸಹ ಪ್ರಾಣಗಳನ್ನು ತ್ಯಜಿಸಿದರು. ಈ ರೀತಿಯಾಗಿ ಸಹಸ್ರಾರು ಯುವಕರು ಭಾರತಮಾತೆಯನ್ನು ಸ್ವತಂತ್ರಳನ್ನಾಗಿ ಮಾಡಲು ಸ್ವಜೀವವನ್ನು ಅರ್ಪಿಸಿದರು.

Indian youths were inspired by Bal Gangadhar Tilak. He declared "Swaraj is my birth right". Youths inspired by him took part in the freedm struggle neglecting their happiness. Among them Bhagat Singh is famous. Perhaps he was a youth of twenty years when he offered his life. Rajaguru and Sukhdev also gave up their lives along with him. Thousands of youths sacrificed their lives in order to mother India.

43) इमं परिच्छेदं पठित्वा प्रश्नानां उत्तराणि लिखत — $5 \times 1 = 5$

अस्मान् परितः पर्वताः वृक्षाः नद्यः च सन्ति । यदा वायुमण्डले धूमेभ्यः वायुः मलिनः भवति तदा वायुमालिन्यं भवति । यदा सरोवरेषु नदीषु रासायनिक वस्तुयुक्तेन दूषित जलेन प्रदूषितं भवति तदा जलमालिन्यं भवति । यदा वृक्षाणां नाशः भवति तदा परिसरनाशः भवति । कार्यागाराणां वाहनानां च शब्दैः शब्दमालिन्यं भवति । अनेन जनजीवनं दुःखकरं भवति । यत्र

[ Turn over

मालिन्यं न सम्भवति तत्र जनजीवनं आरोग्यकरं सुखकरं च वर्तते । अतः परिसररक्षणं अस्माकं कर्तव्यं भवति । वृक्षाणां नाशः न करणीयः । जले मालिन्यं यथा न भवेत् तथा रक्षणीयम् । प्राणिकुलं पोषणीयम् पक्षिकुलं च रक्षणीयम् एवं रीत्या परिसररक्षणं करणीयम् ।

i) परिसरनाशः कथं भवति ?

ii) वायुमालिन्यं कथं सम्भवति ?

iii) परिसर मालिन्येन किं भवति ?

iv) जलं कथं प्रदूषितं भवति ?

v) किं रक्षणीयम् ?

**अथवा**

प्रवासार्थं धनं प्रेषयितुं पितरं प्रति पत्रं लिखत ।

VIII. 44) अस्य श्लोकस्य अन्वयं लिखत — 3

सम्पूर्ण कुम्भो न करोति शब्दं

अर्धो घटो घोषमुपैति नूनम् ।

विद्वान् कुलीनो न करोति गर्वं

गुणैर्विहीना बहु जल्पयन्ति ॥

45) **त्रयाणां** प्रश्नानां उत्तराणि यथानिर्देशं लिखत — $3 \times 1 = 3$

i) अत्र + ......................... अत्रेदानीं । ( रिक्तस्थानं पूरयत )

ii) पठति-पाठयति; वहति — .................... । ( णिजन्त रूपं लिखत )

iii) ''अभिषेकनाटकम्'' ...................... । ( कवेः नाम )

iv) यदि-तर्हि; यदा — .................... । ( नित्यसम्बन्धिपदम् ) ।

46) इमं परिच्छेदं पठित्वा आवरणस्थानानि पदानि चित्वा परिच्छेदं पूरयत — $8 \times \frac{1}{2} = 4$

रामः सीता लक्ष्मणश्च अरण्ये .................... । अकस्मात् पृष्ठभागे नाति दूरात् .................... श्रुतः । रामः लक्ष्मणं सूचितवान् यत् - कः रोदिति इति .................... आगच्छ इति । लक्ष्मणः तत्र गतः । तत्र कश्चन लघुः जन्तुः .................... विलुठन् आसीत् । ........................... पृष्टः सः जन्तुः अवदत् - एतेन मार्गेण बहवः ............................. । ममोपरि .................... स्थापयन्ति । तदा वेदनां असहमानः अहं 'राम राम' इति उक्त्वा तं भगवन्तं .................... पीडां विस्मरामि इति ।

( भूमौ, लक्ष्मणेन, स्मरन् , गच्छन्ति स्म, क्रन्दनध्वनिः, सञ्चरन्ति, पादं, दृष्ट्वा )